णीयं। पुरुषरूपवैयधिवृत्ति धर्मसमवायिवैधगुणत्वं हेतु कर्त्तव्यं एकपृथक्त्वमात्रग्रहीतत्वादिवारणाय गुरुत्वेतीत्युचितं। जन्मते जन्यभावत्वे

वासत्तिपुरःप्रहृयग्रहणायोग्यत्वे च सति व्याघात्वादिति वार्थः। आत्मादिवारणाय घं संस्कृतं। स्वमतं न चेदमनुमानं। परस्यासिद्धेरित्याचार्यैरेव व्युत्पा
णत्वात्। इदत्वत्रावधेयं गुणे भेदसाधकस्य गुणादिवृत्तित्वस्याधिकायाः जन्यतायाः सिद्धेरपत्तकृतत्वकृत्स्नत्वमिति द्वित्वत्रित्वादेरिति। एकैकव्य
क्तिकमेव जगतीति द्वित्वत्रित्वादिकमिति मते हत्वरणस्याभिधानं। तदनधिकरणदेशापर्याप्तवृत्तिकत्वं वा समानदेशत्वं व्याख्यापव व्युत्पादिता शे
षमशेषं कथंचित्संगमनीयं। द्वित्वत्रित्वादीनामिति द्व्यादीनामित्यर्थः। यद्यपि त्रित्वबुद्धिविषयभिन्नविषयत्वं चतुष्ट्वादिबुद्धेस्तथापि व्यावर्त्तुच
तुष्ट्वादिबुद्धिस्तावत् त्रित्वादिबुद्धेर्वाइणां विनापीत्यर्थः। यद्यपि त्रित्व) नाऽतिरिक्तं त्रित्वादिकमनुपपन्नमिति भावः। प्रत्येकाविश्रान्तेः प्रत्येकापर्याप
विश्रान्तेः। मूलेऽविरोधादित्यादि द्व्यासामेदो हि विरोधे सति भवेत्। गोत्वाश्वत्ववत्· समावेशेपि च परापरभावात्· घटत्वशिंशपात्ववत्· न चेह
तदुभयं संभवतीत्यर्थः। प्रकारान्तरमाशंक्य निराकुरुते। अन्यूनेति। मिथोव्यभिचारश्च संकरप्रसंगान्निरस्तो। संभवी च प्रकृत इति भावः। प्रकाशेप
टीत्यादि। तथा चाविरोधादित्यस्याविरोधसंगादित्यर्थः। द्रव्यत्वसमानाधिकरणेत्यादि। तन्मतेनापादनं। स्वमते विपर्ययपर्यवसानात्। आप
नीतन्मते दोषमाह। यावदिति। सर्वत्र द्रव्येन प्रतीयेतेत्यर्थः। सत्तयासहेत्यायादनान्तरं। अत्र केचिदाहुः। द्वित्वत्रित्वादिकं तु व्यासज्यवृत्तिकमेव सा
मान्यं जातिपदवाच्यं भवतु न वेत्यन्यदेतत्। अनित्यसंयोगादेरिव नित्यस्यापि द्वित्वादेर्व्यासज्यवृत्तित्वे विरोधाभावात्। भिन्नं द्विपयासाग्गणंहस

रसादीनामिव समानेन्द्रियग्राह्याणामपि सत्यपेक्षावच्छेदेन समानदेशत्वे प्रतिनियतव्यंजकव्यंग्यत्वे विरोधाभावात् सहचारदर्शनमात्रस्याकिंचित्करत्वात्।
परस्परस्पर्शादिपद्धतिष्वननुगमाच्च। तुल्यव्यक्तिवृत्तिकत्वेपि च भेदे प्रत्ययभेदस्य वक्ष्यमाणत्वात्। अतुल्यव्यक्तिकयोरपि भेदे तस्यैव तन्त्रत्वात्। अन्यथा गोत्वाश्वत्व-
योरपि भेदापत्तिः। एवमतुल्यव्यक्तिकत्वस्याप्यसिद्धेः। विरुद्धधर्मेपि च न्यूनाधिकदेशपर्याप्तवृत्तिकत्वं। अनुगतमत्रांगीकारे च द्वित्वादिसत्त्वयोर्व्यासज्यव्या-
सज्यवृत्तिकत्वमपि। परं तु घटपटं घटपटकुड्यं कुसूलेषु प्रतिद्विकं प्रतित्रिकं द्वित्वत्रित्वप्रतीतावेकतमनाशे तद्वत्त्रैर्द्वित्वादेरपि संयोगादेरिव नाशप्र-
त्ययात्। अनित्यवृत्तिनानाव्यक्तिकमेव द्वित्वादिकं। आश्रयोत्पादविनाशाभ्यामेव च तदुत्पादविनाशौ। असमवायिकार– चाश्रयस्यैकत्वपरिमाणं वा।
एकव्यक्तिवृत्तिकमेकत्वमिव तुल्यव्यक्तिवृत्तिकद्वित्वाद्यपि नानेकं। तुल्यव्यक्तिवृत्तिकद्वित्वादेः प्रतिबंधकत्वात्। सामग्र्यभेदात्प्रागभावविरहाद्वा
न तादृशद्वित्वाद्यंतरोत्पादः। बुद्धिविशेषस्तु तद्व्यंजको न तदुत्पादकः। अपेक्षाबुद्धिरपेक्षाबुद्धिमतेव च तद्ग्रहेनापि ग्रहप्रसंगात्। तदीयापेक्षाबुद्धिज-
न्यं तेनैव गृह्यते। स्वीयापेक्षाबुद्धिजन्यमेव द्वित्वादि स्वपं गृह्णातीति वास्तवभावकल्पने महागौर[illegible]पत्तेः। तं नानापुरुषीयक्रमिकापेक्षाबुद्धिसम-
संख्यतुल्यव्यक्तिकद्वित्वादिकल्पनप्रसंगाच्च। द्वित्वत्रित्वादीनां च न्यूनाधिकदेशवृत्तीनां नीलत्वोत्पलत्ववत् घटत्वपाषाणत्वादिवच्च प्रतिनियत एम.
व्यंजकव्यंग्यत्वं नानुपपन्नं। द्वित्वादौ च गत्यंतरमसिद्धमत एव द्वित्वादिकं। वस्तुतः सत्यपि द्वित्वे द्वित्वप्रकारकप्रमाणाभावः। नित्येषु च एकव्यक्ति

कंनाव्यक्तिकमेवत्वानित्यं। अनित्ययोः संयोगयोरिवनित्ययोरपि द्वित्वाद्योः समाविषयोर्मिथोव्यभिचारेविरोधाभावात्। अस्तुवातद्व्यनित्यं। तज्जन
केश्वरज्ञानोपगमेप्यवस्थापेक्षणीमतत्तत्सहकारिविशेषतत्र द्वेसाभ्यामेवतदुत्पादविनाशनियमः। द्रव्यतस्यकार्यसामान्यसमवायिकारण
तावच्छेदकत्वेद्रव्यएवानित्या संख्याइतरथानुगुणदावपिसंख्यायांसंख्यांतराभ्युपगमेत्वनवस्थेति। अन्येतुविभिन्नान्येवत्तित्वानामनित्या
नांनित्यानित्यानांचनित्यान्येवाद्वित्वत्रित्वादीनि। अनुगतव्यवहारस्तु अनुगतद्वित्वादियोगात्‌ क्वचिद्विनाशव्यवहारस्तु अनुगतद्वित्
त्वादियोगात्‌ क्वचिद्वित्वत्रित्वादीनि। अनुगतव्यवहारस्तु अनुगतद्वित्वत्वादियोगात्‌ क्वचिद्विनाशव्यवहारस्तु अनुगतद्वित्वत्वादियोगा
त्‌ क्वचिद्विनाशव्यवहारस्तु उपलब्धानुपलभ्यमानत्वसाधर्म्यात्‌ श्यामादौनाधिकायपार्थः। जातिव्यवहारनिमित्तंअसमवायित्वेसतिअ
समवायित्वेसतिअनेकसमवेतत्वंसमवेतत्वंवाआकृतिव्यंग्यत्वमात्रंवेति शंकुरिति संक्षेपः। मूले गुणांतरेभ्योरूपादिसंयोगादिभ्यः।
अतएवाग्रेतस्युनरेकद्रव्यमनेकद्रव्यंमनेकद्रव्यंवेत्यत्रपुनःशब्दःपरिमाणमनंतरोक्तव्यवच्छिन्नत्तिइतिवक्ष्यति। तत्तात्पर्यंतुव्यवहितोक्तसं
ख्यामात्रव्यवच्छेदव्यवच्छेदे। रूपादयइत्यत्रादिपदेनसंख्यापृथक्त्वसंयोगविभागानिरिक्तगुणमात्रस्यपरिग्रहणमात्रस्यपरिग्रहः। संयो
गादपइत्यत्रतुविभागस्य। बुद्ध्यपेक्षानेकवृत्तिजातीयत्वस्यपृथक्त्वसाधारण्यंमूलस्वरससिद्धं बुसाधनस्येवविशिष्टस्यपृथक्त्वस्यावृत्तत्वं

गु॰शि॰ मुत्पाद्यपतिप्रकाशकारः। पृषद्धेत्यादिना। सलिलमादिर्यस्यापार्थिवपरमाणोस्तदीयं रूपमादिर्येषां घ्राणउकादिरूपाणामितितद्गुणसंवि
ज्ञानबहुव्रीहिणा। अपार्थिवरूपमात्रपरिग्रहः। अयंमूलेसलिलपदंअपार्थिवपरंएकदेशोत्कीर्त्तनंवा। तस्य। तत्तद्धर्मरूपेणनित्यद्रव्यस्य।
घ्राणुकादेः कार्यद्रव्ये प्रकाशेप्रकारवाचीति। अन्यथाहिज्ञापरिग्रहप्रसंगादितिभावः। स्वव्यापकेति। स्वविजातीयसंख्याव्याप्यत्वशून्य
त्वमित्यर्थः। समानाधिकरणेति। सामानाधिकरण्यमिहनिपतंयाद्यं। तथाचस्वव्याप्यानेकवृत्तियावत्संख्याव्याप्यत्वं। स्वाभावासमा
नाधिकरणैकत्वान्यसंख्याभावासामानाधिकरण्यमितियावत्। समानाधिकरणेति। समानाधिकरणमिहव्यापकं। अधिकरणंवा
उपेत्यधिकरणप्रणनूपंतथाचस्वव्यापकयावत्संख्याव्यापकत्वंस्वसमानप्रणेतेसिन्निकपावत्संख्याव्यापकत्वंवार्थः। एकद्रव्योत्पादप्रणे
त्वनिषमेनद्रव्यांतरविनाशोत्पादोपगमेनाद्यं। तत्रचयावत्त्वमशोघत्वं। तेनयुगपत्तुल्यव्यक्तिकपराईद्रूपविरहेपिनक्षतिः। द्रूपमपिचेदंपरा
ईस्यस्वाव्यवहितपूर्वक्षणावर्त्तियावद्द्रव्यवृत्तित्वनिममते। अन्यथापेक्षाबुद्धिविषयीभूतानाधिकदेशवृत्तिपरार्द्धद्रूपोत्पादेद्व्यत्वत्वेरधि
कदेशवृत्तेरधिकदेशवृत्त्यकत्वेनाव्याप्तेः। तादृशव्यापकत्वेनाव्याप्तेः। तादृशव्यापकजातीयत्वंवावक्तव्यं। साजात्यंचबहुत्वव्याप्यजात्यावो एम०
ध्यं। परार्द्धत्वंचेहतथा। एकत्वपदादित्यादिसहपैकशेषविरहेषमात्रविजृंभितं। वस्तुतस्त्ववांतरलिंगसंख्यावोधविरहस्थलेएवदोषदा

द्रव्यारा वैकशेषानभ्युपगमो वेत्यप्यपास्तं। अवांतरलिंगसंख्यावोधस्य विनैकशेषमसंभवात्। स्वतंत्रास्तु कार्यकारणभावनिरूपकसंबंधि
नः कार्यकारणान्यतरस्य वा एकार्थप्रत्यासत्त्या कारणत्वेनात्मान्यसमवेतासमवेतधर्मसमवायप्रयत्नादिना विशेषितेन यत्नेन न कारण
त्वं मानाभावात्। परं तु यद्धर्मवंतमंतरेण यद्धर्मवतो नोत्पत्तिस्तद्धर्मवान् तद्धर्मिणः कारणं कल्प्यते। न च सत्तामपेक्ष्य वुद्धौ सत्वाद्यपेक्षु
द्वित्वादीनामेकत्वमंतरेणानुत्पत्तौ किंचित्प्रमाणमस्ति। अतो न द्वित्वादेः कारणमेकत्वं। एवमेव पृथक्त्वमपि नावयविनामेकत्वकार।
एतेन पृथक्त्वं व्याख्यातं। मूले द्रव्यांतरापेक्षेत्यादि। न यावत्तत्तद्व्यणुकत्वत्रित्वादिजनितात्तत्तद्द्वित्वत्रित्वादिकात्कार्यत्रित्वादिक
मिति न कारणगुणपूर्वकत्वायोगः तत्तद्द्वित्वत्रित्वादिकात्कार्यत्रित्वादिकमिति न कारणगुणपूर्वकत्वायोगः तत्तद्द्वित्वादिभिरेकत्वै
स्तत्कार्यत्रित्वादिकं जननीयमिति क्रमेण कार्यः। एकत्वस्य त्रित्वादिविजातीयत्वात्। अन्यथा कारणगतयोरेकत्वाभ्यां द्वित्वेन वा कार्ये त्रि
त्वाद्युत्पादः संभवादुदासीनैकत्वाद्यनुसरणमफलं स्यात्। कारणमात्रे गुणपूर्वकत्वे कारणकारणगुणपूर्वकत्वे च कारणगुणपू
र्वकत्वमप्रत्यक्षमित्याशंकते। कारणेत्यादि। कारणशक्तिवैचित्र्यात्कार्यवैचित्र्यं स्यादित्यत आह। किंचेति। नैरित्यादि बहुवचनं द्वित्वा
दिकमित्यादिपरं वा नास्यापां। उदासीनैकत्वस्य प्रत्यासत्तिविरहेणैकत्वाजनकत्वात् त्रिभिर्द्वा परमाणुभिर्द्व्यणुकानारंभात्। अत एव

गु॰ शि॰ त्वादिः कारणगुणपूर्वकत्वात्। आंतरालिकद्व्यणुकानुपपत्तेः मतेन चातयाऽभिधानं। तथा च ताभ्यां चैतेरितियथामतं योजनीयं। कारण
विशेषस्य स्वभावागः शंकते। कार्यमित्यादि। कारणगतेनैकत्वेनैकत्वजनयितव्ये कार्यद्रव्यमपेक्ष्यतेन स्यात्तयः स्वाश्रयद्वित्वेनतु स्वाश्रमेन।
कार्यद्रव्यमितिनाविशेषद्वयस्यर्थः। निराकरोति। नकार्यपि सृयापीति। कार्यंकारणद्वित्वेयासामग्री सा कार्यकारणत्रित्वेपीतितयोरभेदप्र
संगः। त्रित्वेऽतिरिक्तैकत्वानदाश्रयापेक्षापामपिद्वित्वसामग्री प्रभवत्वेन तस्यद्वित्वेपि शेषत्वापत्तिरित्यर्थः। पूर्वोक्ते एकद्रव्यं प्रसत्येतेनसत्वाद्वित्व
त्रित्वाघविशेषप्रसंगाद्दोचशंकतेप्रकाशकारोनचेति। त्रित्वमित्यंतेन आश्रयनियमस्य पयाधकार्यभेदमुपयाधकार्यभेदमुपपादयति
प्रागभावेति। एतेन प्रागभावस्यापेक्षणीयत्वेन। एकैकस्यैवद्वित्वादेः अविरलजलग्रहित्वधारोत्पत्तिरपिनास्ति। ईश्वरीयापेक्षाबुद्धिजन्य
त्वावादिनामिवास्माकमपिकालविशेषादेरपेक्षणीयत्वान्नद्वित्वनाशादेर्विनाशइतिनाविनाशप्रसंगोपीतिमूलेद्वित्वद्विपपत्त्याद्यैवेति।
घटविशेषत्वपाषाणत्वयोर्मूलाग्रावच्छिन्नयोश्च पुरुषत्वनृषत्वत्वस्संयोगयोर्वारणायसमानदेशत्वंसमनियतावच्छेदकावच्छेदकत्वापर्य
कं। विभिन्नपुरुषीयद्वित्वाद्योर्वारणायसमानेंद्रियग्राह्यत्वं एकेंद्रियव्यक्तिवेद्यत्वापर्यकं। द्रव्यावयवयवबहुत्वयोर्व्यभिचारसंभवेगुणत्वेन आ एम॰
द्रव्यत्वेनवाविशेषणीयं। व्यंजकनियमः एकव्यक्तिकमात्रव्यंग्यत्वं। यद्यप्येकप्रयत्नकृदृषत्वान्स्यैकत्वद्वयविषयत्वप्रयोज्येणाद्विप्रयत्न

ज्ञानस्यापि द्वित्वविषयताघटितव्यंजकतयापि पृथक्त्वरूपज्ञानं विना द्वित्वपृथक्त्वाग्रहात्तस्यावश्यकत्वेन तादृशं संख्यापृथक्त्वविषयत्वाभ्यां न कार्यकार
णाभावग्रहो मानाभावादिति नातिप्रसक्तप्रतिषेधः। एवं च स्नेहद्रवत्वादीनामन्योन्यव्यंजकत्वस्वसन्निकर्षव्यंग्यत्वानां एकैकग्रहप्रतिबंधकदोष
विशेषाभावव्यंग्यत्वानां च वारणाय स्वस्वसत्ताकर्षेत्तरभावत्वेन व्यंजके विशेषणीयं। व्यंजकत्वं च व्यक्तिस्वरूपयोग्यता तेन कदाचिदेकैकमात्रग्र
हेपि न व्यभिचारः। व्यक्तिश्च लौकिकः साक्षात्कारो विषयजन्यं ज्ञानं वा। एवमेव च वर्णानां तथात्वं ध्वनीयं। परं तु ते निरुक्तहेतुशालिन एव ष
ष्ठीकारणीयाः। पक्षाग्रप्रतिनिपतद्व्यंजकव्यंग्यत्वं उभयाविषयकलौकिकसाक्षात्कारविषयत्वं परस्परजनकयोः पर्यधिकरणत्वरूपायोर्म
जोश्चावच्छिन्नयोः ग्रहे पुरुषसंयोगयोर्नीलनीलत्वयोर्घटघटत्वयोः पाषाणत्वयोर्जलत्वकरकात्वयोर्द्रव्यावयवसंयोगयोश्चकारणपरसंतप्र
ज्ञाकार्यकं। अवच्छेदकत्वं च देशकालसाधारणं बोध्यं। रूपरसादौ व्यवहारणाय विशेष्यतद्रूपविशेषक बहिरिंद्रियव्यक्तिविषयत्वाद्यत्वं लौकिके
कसाक्षात्कारविषयत्वं एकज्ञानजनकत्वमिति यावत्। तेन विभिन्नपुरुषीययोः समनिपतद्योर्न व्यभिचारः। कदाचित्त्वं भवतोश्च समनि
पत। रोर्देशकालयोर्द्रव्यावयवबहुत्वयोरेकज्ञानजनकयोर्निरुक्तसाध्यवत्त्वमपि। पृथक्त्वग्रहे त्वावश्यकसंख्याग्रहः। अभिभवादिदूरत्व
संकोचादिवशात् रूपस्पर्शपरिमाणसमवेतावीतरजातप एवं न गृह्यंत इति मतेनेदं। असति प्रतिबंधक इत्यनेन चानिरुक्तव्यंग्यत्वं

गु॰ शि॰ विशेषगुणीयं । निसक्रहेतुशाजिनोस्त — मिलितापत्येकंचत्तानजनकत्वमसंभावितमेव । संभाव्यत्वे वा साध्ये हेतौ वा विषयत्वेन जनकत्वं विच्छ्रण ।
यो ऽत्यं चैकसाक्षात्कारविषयशब्दानामेव तत्पात्वं साध्यं । परेण तेषां परस्परव्यभिचारियाहकत्वाभ्युपगमात् । पक्षविध्याप्यवृत्तेर्देशानवच्छे
दत्वमतेएकदेशावच्छेदत्वस्पतत्रूपेन वरणसंयोगयोरेकैकमात्रग्रहसंभतेन समानियतदेशानविशेषितस्य हेतुत्वे सर्वसमंजसं । अ
तएव एकरूपत्वरूपस्पर्शपरिमाणस्नेहद्रवत्वानां कदाचिदेकैकमात्रग्रहसंभवेपिन क्षतिः । परंतु परेण शब्दस्यापि व्याप्यवृत्तित्वाभ्यु
पगमात् पक्षधर्मतासंपत्त्यै तथाभिधानं । यदि च व्याप्यवृत्तेर्देशादवनित्यस्य कालोपि नावच्छेदको मानाभावात् । एकत्र धर्मिणि तिभावाव
योर्विरोधेनैवावच्छेदकमेदाभ्युपगमात् । न च क्वचिदेकस्मिन्नित्ये तदभावयोः संभवः नित्यस्य देशकालविशिष्टप्रतीतिस्तु हतित्वमवगा
हते तत्र चाच्छिन्नत्वावगाहिनी तु भ्रांतिरेवेति विभाव्यते तेन दाएकावच्छेदेनेत्यनियमेन नियोऽनवच्छेदकान्वेषत्वमर्थाद्वक्तव्यः । तदनवच्छे
दकत्वं च तत्रानवच्छेद्यत्वकृतं अतो न शब्दावच्छेदकाप्रसिद्ध्यापि क्षतिः । समनियतकालजलपटुयादिवारणायसमानदेशत्वं । यदि च घटत्वा
देः संस्थानविशेषरूपपाषाणत्वादेरपि रूपादिविशेषो व्यंजकः । अग्रहणं च तत्स्व विनापि दोषं तद्ग्रहात्तदा समनियतव्यक्तिकत्वं वाच्यं स एम॰
वेदिदं समवायेन वृत्तिमधिकृत्य साएक । स्मित्रेव काले गोत्वादितदभावयोर्बाधावच्छेदकत्वस्यावश्यं वक्तव्यत्वादिति । अथवा एकावच्छेदेन सेक

तेनपिचपाकवादिमतेऽनुभिकगंधयोर्निरासः व्याधिकरणयोस्तयोर्वारणाय समानदेशत्वइति । समनियतव्यक्तिकत्वइत्यर्थः । तेनरूपत्वादि
त्वप्रभात्वस्याग्रहे ऽपि स्पर्शस्य इंद्रनीलप्रभायां च श्वैत्याग्रहे प्रभात्वस्यग्रहेऽपि तयोर्व्यभिचारः । मूलोक्याव्यवच्छिन्नयोः प्रभात्वतत्संयोगयोरनुद्भूत
त्वस्पर्शवत्त्वयोः स्पर्शनग्रहणायोग्ययोर्वारणाय । ऽ समवेतत्वमपि वक्तव्यं । रूपरसयोः परिमाणयोः स्नेहद्रवत्वयोः
प्रत्येकं गृह्यमाणयोर्वारणाय समानेति । समनिंद्रियग्राह्यत्वं च प्रतिनियतैकैकेंद्रियग्राह्यत्वं दर्शनस्पर्शनोभयाग्राह्यत्वे । सति एकेंद्रियग्रा
ह्यत्वं अग्राह्यत्वं ग्रहणायोग्यत्वमिति ज्ञेयः । प्रकारेणमस्तु द्वित्वं तु तुल्यन्यायेन ग्राह्यतइति तत्र व्यंजकांतरापेक्षां । स्वीयापेक्षाबुद्धित्वादिकं प्र
त्यक्षमिति मूल एवाभिधास्यते । तेनावनादौ च बहुत्वावांतरजातिविशेषग्रहएवापेक्षाबुद्धिविशेषापेक्षापीति न काचिदनुपपत्तिरिति । अ
पेक्षाबुद्धिव्यंग्यं । अपेक्षाबुद्ध्यधीनव्यक्तिव्यक्तं । द्वित्ववृत्तिसामान्यज्ञानसमकालमित्युत्पत्तिकालमभिप्रेत्य । तथा च द्वित्वगुणज्ञानक्ष
णकालमित्यर्थः । क्वचित्तु द्वित्वगुणनाशेनेति पाठः तस्य कारणेकार्योपचारादपेक्षाबुद्धिनाशेनेत्यर्थः । उपलक्षणं चेदं । बुद्धिद्वित्वयोर्भि
न्नेंद्रियवेद्यत्वापत्त्यप्रसंगातइति ।। योर्वा पर्ययग्रहः क्वचित्कथंचिदुपनयादिवशात् । मूले तेनानुविधीयमानत्वादिति । तेनोत्तरस्य
ण घटादिव्यंजकालोकादिवारणाय व्यंजकत्वानुपपत्तेरिति । प्रकाशेऽनत उक्तमित्यादि । तथा चाभिव्यक्तावनुविधानं विवक्षितं नस्व

गु॰ शि॰ जावितिभावः। प्रतिनियतवेगवृत्तिजातिमत्त्वं वा न्ति वक्ष्यति। प्रतिनियतवेगा वेगाजातिस्तद्वत्त्वं वा। आद्ये पूर्वोपदर्शितजातीये सर्वत्र तरुपादौ निर्विक-
ल्पकजीवनयोनिप्रयत्नयोश्च व्यभिचारः। असिद्धिश्च परस्य। द्वितीयेनुस्वतोप्यसिद्धिः द्वित्वादेर्नानापुरुषवेद्यतोपगमादित्यरुचिरतास्यर्याम्याम
हृ। तद्गीत्यादि। जागरा वेतितत्पातायां संप्रदानानां पुरुषाणां वेद्यावेद्या वा याव्यक्तिस्तद्वृत्तिजातिमत्त्वं वार्थः। नानापुरुषवेद्यावृत्तिवेद्यजातिमत्त्वं
वेतितत्त्येयं। व्यवधानेन। व्यवधायकेन परंपरं पाइन्द्रियसन्निकर्षस्य प्रतिबंधात्। मूले ऽभिव्यंजकइति। अभिव्यंजकत्वं समवेतोत्पादकत्वे मानाभा-
वादिति। पूर्वोक्तत्रेति युगपत्द्वित्वद्वयानुपलंभात्। इदंचाभ्युपगमात्रं। द्वित्वादेः समानपुरुषीयद्वित्वादिप्रतिबंधकत्वोपगमेतु द्वित्वांतरानु-
त्पात्पानुपलंभो संपत्तिरितिमंतव्यं। प्रकाशेकार्यद्रव्येत्यादि। अत्रकार्येति द्वित्वकालेविनश्यद्द्रव्यस्यत्स्यनित्यद्रव्यं चतदानीमविनश्यद्द्रव्यस्या-
स्योपलक्षकं। गुणत्वेत्यस्यमूलस्यतेनेत्यादिः। आश्रयपदेनेत्यादि। तथा चगुणेतिप्रागभाववारणायेतिभावः। मूले गुणपदं असमवायिकार-
णता शानाश्यगुणपरमितितुभावः। प्रत्यक्षं लौकिकप्रत्यक्षं। मूले धर्मधर्मिभ्यामित्यस्य तद्रूपसंबंधाच्चेति शेषः। कारेणेति। ककारपदं
विजातीयशब्दपरं। द्वितीयशब्दपरं। द्वितीयककार एवकत्वविशिष्टबुद्धौ भातिविरहात्। विशेषणावद्द्सत्तोपि विशेष्यस्यकं पंविशिष्ट १७०
ज्ञानविषयत्वमितितु द्विंत्यं। द्वित्वादिविरोधीति। विरोधोभेदः एवमग्रेपि। आश्रयाणामाधुर्यास्यतमरसत्तोपि विशेष्यस्यकं पंविशिष्ट

तद्बहूनां त्रित्वाद्यन्यतमसंख्यावत्त्वनियमात्। बहुत्वत्वानां त्रित्वादित्वंशयोनानुपपन्नइत्यत आह। त्रित्वाद्यवित्ति। बहुत्वस्येत्यादि बहुत्वशतत्वप
देशजातिविशेषपरे। द्वित्वातिरिक्तेति वार्थः। एतादृशोपाध्यनिष्ठेपि त्रित्वादिषु बहुत्वव्यवहारात् एकत्वद्वित्वादिवत् बहुत्वत्वमपि संख्यात्व
व्याप्यजातिविशेषः। तद्व्याप्यं तु त्रित्वत्वादिकमित्यपि केचित्। बहुत्वस्य तत्त्वस्य। स्वेन समानजातीयात् त्वाश्रयात् प्रकर्षेण समं सामानाधि
करण्यं न स्यात्। द्वित्वत्वादिवत्। संख्यात्वव्याप्यजातिव्यापकत्वात् तथात्वं नानुपपन्नमिति तु ध्येयं। तेन विशेष्ययोर्बुद्धी इत्यर्थः। असतोपि विशेष
णस्य विशिष्टबुद्धिं प्रति कारणत्वं नियामकत्वमिति स्यात्। अनेन निराकृतं तस्मादित्यर्थः। रूपादेरिवैकत्वस्यापि सत्त्वं। तस्य स्मरणमनुभवसिद्धं
न च वस्तुस्वभावादिनापि द्रव्यपारतंत्र्येण तत्स्मापत्तिः। गंधत्वादिविशिष्टगंधज्ञानस्येव एकत्वे विशिष्टे। एकत्वज्ञानस्य संस्कारजनकत्वे बाधकाभावा
च्चा अनुभवसिद्धोपेकत्वरूपप्रतीत्यनंतरं अयमेकोयमेक इति प्रतीतिः। न च भवतां तद्धेतुत्वादेः किंचिन्नियामकमस्ति। तथात्वेपि वानुव्यवसायः
केन वारणीय इत्यत एवैकत्वविशिष्टद्रव्यज्ञानमेवापेक्षाबुद्धिमंगीकृत्याह। यद्यपीत्यादि। संस्कारजननसमर्थत्वं जनयतः केन वार्यताम्
त्यत आह हेतुद्रव्येति। सत्यपि विरोधिगुणे ज्ञानाविनाशस्यादृष्टस्यापि फलेनैव कल्प्यमस्यान्यथानुपपत्त्या। द्वित्वनिर्विकल्पकसामग्र्याः प्रतिबं
धकत्वमास्थीयत इति भावः। एवं च निर्विकल्पकद्वित्वविशिष्टद्रव्यज्ञानसाधारण्याद्वित्वज्ञानसामग्र्या एव प्रतिबंधकत्वमास्थातुमुचितं तथा

सति द्वित्वविशिष्टद्रव्यत्वप्रत्यक्षकालेपि द्वित्वं लभ्यते। अत एव चाविरलत्वया द्वित्वविशिष्टप्रत्यक्षसंतानोपि सूपपादः। प्रकारांतरेणापि द्वित्वविशि
ष्टप्रत्यक्षं संभवति। तथाहि। अपेक्षाबुद्धिः अथ द्वित्वं अपेक्षाबुद्ध्यंतरं च प्रतिबंधकविरहात्। ततः पूर्वापेक्षाबुद्धिविनाशः द्वित्वनिर्विकल्प
कद्वित्वांतराणि। अथोदीच्यद्वित्वे द्वित्वविशिष्टज्ञानं ततो द्वे द्रव्ये इति बुद्धिरिति। अनुमितित्वविशिष्टानुमितित्वस्य एकमात्रसुखोत्पादे सु
खत्वविशिष्टसुखत्वत्वस्यैव चोपनयवशाद्वै द्वित्वत्वविशिष्टद्वित्वविशिष्टप्रत्यक्षं स्थूलं कालमालंब्य वर्त्तमानावभासस्यापि केचित्। घ
टकमित्यादि। आलोकादिसंयोगस्योद्भूतरूपस्य च विरहेणाप्यंतरवारणाय पक्षसत्त्वं विशेषितमुद्भूतरूपवदिति पक्षविशेषणं। इंद्रि
यां चक्षुः। हेतौ सति प्रतिबंधकाभावे सति चक्षुर्मनोयोगादाविति च पूरणीयं। द्रव्यत्वमविवक्षितं। अनेक इति। अनेकद्रव्यवत्त्वस्य साम्ये
तुल्यकसूत्रणादौ वैपरीत्ये च महत्त्वोत्कर्षेण प्रत्यक्षोत्कर्षात्। अवयवतदवयवपरंपरासाधारणानेकद्रव्यवत्त्वस्य दुर्वचत्वात्। लाघवाच्च महत्त्वमेव प्र
त्यक्षप्रयोजकमिति तु तत्त्वं। जात्यभावः महत्त्वे महत्त्वदीर्घत्वातिरिक्तवृत्तिगुणत्वव्याप्यजातिसामान्याभावः। सात्कौ — कारविरोधित्वं तदवच्छेदकत्वं
साक्षात्कारविषयवृत्तिवृत्तित्वमिति यावत्। तेन न परममहत्त्वस्यातींद्रियत्वेनाप्यंतरं सिद्धसाधनं वा। संख्यापृथक्त्वादिषु व्यभिचारवारणाय एम॰
प्रयोजकांतं। साक्षात्कारो द्रव्यस्य तेन संख्यादेः स्वस्वजातिसाक्षात्कारकारणत्वेपि न क्षतिः प्रयोजकत्वं कारणतावच्छेदकत्वं उद्भूतरूपवत्त्वादि

नावयवादेर्न्नानादिमत्त्वेन चात्मनः प्रत्यक्षोपगमादित्यपि केचित्। अदृष्टवारणाय मूर्त्तेति। पिशाचशरीरादिजनकतावच्छेदकसंयोगगतजातिविशेष
स्य सत्त्वादेकवृत्तित्वेन विशेषणाज्ञानस्य योगे व्यभिचारः। तुल्येति तावतापि संदिग्धोपाधित्वं दुर्वारं अप्रयोजकं चानुमानं। यद्यप्यभेदेनान्वयस्यौ
त्सर्गिकत्वात्सामान्यशब्दस्य समभिव्याहृतविशेषपरत्वेन तुल्योत्पत्त्यत्वे उत्पत्त्यत्वस्य जातिविशेषत्वेनान्वयविरहात्। अन्यथा गोवलीवर्दन्यायविशेष
प्रसंगात् प्रकृते च यथासंभवाच्च। न चापि अस्ति तात्पर्यविशेषे सामान्यशब्दस्य वैयर्थ्यप्रसंगेन समभिव्याहृतेतरविशेषपरत्वमभिप्रेतमतस्मायो
मूलेऽभिहितः। मूले विकल्पे पदस्यादि। प्रकर्षमात्रमहत्त्वप्रकर्षस्याभावः। प्रकृष्टमहत्त्वमिति यावत् तस्याभावः। एवमग्रेपि प्रकृष्टदीर्घत्वाभावो वो
ध्यः। ह्रस्वत्वं ह्रस्वस्य ह्रस्वत्वस्यार्थः। महत्त्वव्याप्यमेव दीर्घत्वं तयेष्यते महत्त्वविरुद्धं चाणुत्वादिकं अस्ति हि मतो न साध्याव्यापकत्वं परमाण्वादेः स्वप्र
त्यक्षत्वप्रयोजकमहत्त्ववत्त्वे प्रत्यक्षत्वापत्त्या न साधनव्यापकत्वमित्याह प्रकाशकारः। महत्त्वेत्यादिनोद्भवापत्तेरित्यन्तेन। महत्त्वमित्येतेन। वस्तु
तो महत्त्वसाम्येपि दीर्घत्वस्योत्कर्षे रागप्रत्यक्षोत्कर्षात् तदपि तत्प्रयोजकं। महत्परिमाणमिति। सत्तागुणत्वाभ्यां रूपादिसाधारणी जातिरनुपलं
भबाधिता। जातौ गुणत्वाव्याप्तित्वं हेतौ च योग्यत्वं विशेषणं देयमिति नापत्तिरव्यभिचारौ। घटस्येत्यादि। साध्ये नानाजातिव्यापकत्वेन जा
तिविशेषणीयाहुः स्वासंभिन्नत्वेत्यादिना नानाविधविहितक्रियाजन्यनानाविधस्वर्गवृत्तिसुखत्वं च व्याप्यैकजातौ मानाभावत्। यथा कथंचिद्

गु॰ शि॰ गुजत्वमात्रस्य कारणतानवच्छेदकत्वात्। शतत्वानंतप्रसंगाच्च बहुत्वस्य सङ्ख्यात्वादिविशिष्टस्यैवाशक्तिरिति तु टीकाकृतः। शजातीयावधि
त्वं सजातीयमनिष्ठोत्कर्षावधित्वं एवमनयादिशा तत्र तत्र सजातीयनिष्ठापकर्षावधित्वं चाक्रव्यमित्यपि सकलजप्रसमुदायमाहुः। दीर्घत्वप्र
कर्षेस्यादि। दीर्घत्वप्रकर्षाभावापेक्षा इति पाठः प। दीर्घापेक्षा इति पाठे तु ह्रस्वव्यवहारो ह्रस्वव्यवहारप्रयोजकप्रकृष्टदीर्घत्वाभाव इत्यर्थः तु
ल्यमिति वस्तुतस्तेषां व्यक्तिबाहुल्यस्याप्रयोजकत्वे त्रिभिः परैरनवरोधात्। शतेन नैकत्वेऽपि महत्त्वप्रकर्षो न स्यात्। अस्माकमपि तु न शतेन
तुदैरेकेन महत्तोमहत्तावत्त्वात् तु दैः पंचाशता पंचाशता च महत्त्वद्वित्वावच्छे परं तु सामानाधिकरण्यव्यक्ति। बाहुल्यमेवाप्रयोजकमिति मंतव्यं।
अवयवे परत्वाणुत्वादस्य संख्योत्पत्तिकाले संभवादाह। एकत्वं चेति चकारपरत्वादिसंबंधसमुच्चये अन्यतरेति वस्तुतस्तु दैर्घ्यं न उपपर्ध्यो भा
वावच्छिन्नैः समानदीर्घभावे पंचभिर्वारत्वधारणयाविधेर्दशभिर्दीर्घतरे च्छन्निचतुरैवावे धनु विनापि च संयोगभेदे गगनानां दीर्घतरादिव्यवहा
रात् संयोगवैजातीयमित्यर्थः। म्हदास्तु त्रुट्यावेव विश्रामात्। घ्णंणुकादिकमेव नास्ति हृस्वत्वं तावत् ह्रस्वत्वं निराकृतं चानेकद्रव्यवत्वस्य। प्रसत्तश्च प्रयो
जकत्वं नित्यस्य च गगनादि महत्वस्यामहत्वेऽजनकत्वं स्पर्शासमानाधिकरणत्वात् समवायिकारणविरहाच्च अस्तु वात्र सत्त्वेनुवृत्तं च संख्यैव परि रम०
माणजनकेति प्राकृद्व्यणुकादिसत्वेऽपि अनुत्पादिप्रमाणाभावः द्रव्यत्वस्याप्रयोजकत्वात् तस्यापरिमि। तावत्त्रित्वादिति द्र्याच तत्कप्रसरात् तन्नवेप

रम्पमहत्त्वमपिनस्यात्तस्मादेवैतस्मैसूत्रउपपदेतिउपवर्जितसमभिव्याहृतंयत्पदंतन्निबंधनाविभक्तिरुपपदविभक्तिः॥ यथास्पृहधातुयोगेपु
ष्पेभ्यःस्पृहयतीत्यादौकर्मणिचतुर्थीः अन्यशब्दस्यशब्दपरत्वेयदान्यपटः पृथक्भिन्नइत्यादौपंचमीनस्यात्ः अर्थपरत्वेसूत्रेइतरपदमुप
लक्षणत्वसूचनाय। नञर्थेति। यथावान्योन्याभावएवनञर्थोनतुतद्द्विविधस्तत्पोपपादितंनञ्वादेअघटइत्याधर्म्युत्तुपमात्रे। अघटपदं
जानीहीत्यादौप्रथमायाइवसमासेपंचम्याअपिलोपेभ्रान्तिविरहात्। तात्पर्यंतुघटात्पटोनघटस्यभेदइत्यादौपंचम्यानुपपत्तौ। अत्रवदंति।
अन्योन्याभावएवपृथक्त्वंप्रामाणिकप्रयोगाधीनंचैतत्तेषुशब्दप्रयोगेपंचम्यनुशासनमन्यथोपपद्यमानेनार्थांतरसाधकं। अतएवेहपृथ
ग्रसःपृथगित्यादिव्यवहारःप्रामाणिकानां। गुणांतरवत्ताविषयत्वेबाध्यत्वापत्तेः एकत्वादिवत्परंपरासंबंधेनतदापितत्रवर्त्ततइतिचेत्। त
द्रूपात्ररूपंपृथगिमपिव्यवहारापत्तेः। अवध्यभेदेनचपृथक्त्वेदोषगमेएकस्यैवकौअनंतकोटिपृथक्त्वकल्पनापत्तेः अपिचैतदीयंरूपमे
तस्मात्पृथगित्यादिव्यवहारानुपपत्तिः। तत्रान्योन्याभावपरत्वंपृथगादेरितिचेत्। सत्यं। पंचमीतुकमर्थमाहइत्यभिधातव्यं। प्रतियोगित
मितिचेत्। घटापेत्यादेरपिप्रसंगात्। शब्दविशेषयोगएवपंचम्याः प्रतियोगित्वबोधकमितिचेत्। आपाततोऽसिमार्गेणघटात्पूर्वइ
त्यादौचपंचमीप्रतियोगित्वमेवाह। पूर्वत्वादेःप्रागभावादिघटितत्वात्। घटात्पटःपृथगित्यादिप्रत्यक्षंपटादेरवधित्वंविषयीकुरुतन

गु॰ शि॰ तिपुनरसिद्धं॰ द्विपृथक्त्वंतु॰ नूपसुदरपराहतं प्रत्येकविश्रान्ताभ्यामेव पृथक्त्वाभ्यांद्वौपृथगितिबुद्धेरुपपत्तेः। घटपटौमिथः पृथगितिबुद्धिर्जायत
एव॰ नजायतेतुपरावधिकपृथक्त्वस्य घटेविरहात्। मूलेएकपरत्वस्यएकतरनिष्ठपरत्वस्यअन्योन्यापेक्षितत्वात्॰ अन्यतरावधिकत्वात् दै
शिकयोश्चविभिन्नदिक्त्वपरत्वस्यतदन्यापेक्षितत्वात्तदुभयावधिकत्वादित्यर्थः। कालिकयोः परत्वयोरन्योन्यावधिकत्वस्याभावात्। दैशिक
योश्चविभिन्नदिक्त्वपरत्वस्यतदन्यापेक्षितत्वात्तदुभयावधिकत्वादित्यर्थः। कालिकयोः परत्वयोरन्योन्यावधिकत्वस्याभावात्। दैशिकयोश्चविभि
न्नदेशस्योभयापेक्षयामध्यस्योभयनिष्ठयोस्तत्संभवेपि ग्रंथस्यतत्परत्वेनत्राप्येकस्यपरत्वादिसाधयिमत्रंपातंगतेः। प्रकारोपेक्षाबुद्धेरि
त्यस्यद्रव्यद्वयेसमानाधिकरणपृथक्त्वाभ्यांवेत्यर्थं तैसैवेत्यस्यविशेषणविषयतया। तिशेषः नूपादीति त्रिपोविंशतिपदंयावत्तां समवायि
कारणत्वसंभवस्तत्परं। परत्वादीनामसमवायिकारणत्ववाधात्। विपर्ययेननैरर्थ्यांतरं। पूर्वसंयोगाभावः संयोगस्यकारणंनतुसहकारीत्यत
आह। समवायिकारणंचेति। पदद्वयं संयोगपदं द्रव्यपरं। अभावश्चध्वंसः महापटनाशेतस्यैवायव्यवस्थितसंयोगेभ्यः खंडपटोत्पत्तेः ननुभावा
नपेक्षत्वंतद्व्याप्यमतआह॰ समवायीति। अपत्वाजनकभावानपेक्षत्वं तद्व्याप्यमतआह। तथेति। त्वाजनकेतित्वजन्यजनकाजनकेतित्वत राम॰
मानजातीयाजनकेतित्वनिष्ठजनकतावच्छेदकरूपावच्छिन्नाजनकेतिचार्थः निनत्वाजनकावयवानरापेक्षितेपिन क्षतिः। त्वविजातीय

नं सवृत्तिगुणत्वव्याप्यजातिशून्यत्वं । मूले एतेन । संततिसंयोगे द्रव्यस्यानपेक्षितत्वप्रदर्शनेन । सोऽसमुत्तरेति । यद्यपि स्वपूर्वस्थापितत्वपूर्वस्त्वं तु संयोगो
नियमेनोत्तरभावित्वं तु संयोगांतरस्य चिह्नतादृशांतत्वं तत्रापेक्षते । तथापि तादृशजातीयत्वं वक्तव्यं । तादृशश्च अवयवद्रव्यारंभकश्चरमोवा
वयवसंयोगः । इत्थं च भावभूते ननु पादेयं विपरीतो वेगस्तदभिहन्यमानद्रव्यविपरीतवेगोत्कर्षेणाभिघातकद्रव्यविपरीतकर्मोत्कर्षदर्शना
त् । तस्यापि तद्धेतुत्वमिति हृदयं तज्जनकेति । यद्यपीदमभिहन्यमानमात्रकर्मजनके ऽभिघाते ऽव्यापकं । तथापि तादृशजातीयत्वं वक्तव्यं । कारण
महत्त्वमिति विजातीयापेक्षितत्वमतिप्रेत्य अपिर्वा अध्याहर्तव्यः । संयुक्तेत्यादिसूत्रे अये रोषस्वं वैशेषिकं तूपादानपतीशेषः । इदं त्ववधातव्यं द्र
व्यारंभे निरुक्तनिरपेक्षत्वं गुणकर्मारंभेपि तत्र च निरुक्तसापेक्षत्वं द्रव्यारंभेपि स तु लभमिति । एतत्तु वक्तव्ये द्रव्यारंभेपि नियमेन विजातीयस्य
र्त्तगुणानपेक्षत्वं । अदृष्टादिव्युदासाय पर्यवृत्तेति । यदि च द्रव्यविशेषे रसादिविशेषोपि हेतुस्तदा रसायनस्यैव न गुणोविशेष्यः । गुणकर्मारंभेपि
तादृशरूपः कचिन्नतदपेक्षितत्वपर्यवसन्नः । तेनादृष्टनिरपेक्षेणावयवसंयोगादिनावयविसंयोगादिजननेपि न क्षतिः । परिमाणजनने
महत्त्वापेक्षणात्कर्मजनने नियमेन वेगापेक्षणादिति । प्रागभावप्रतियोगी सादीत्सर्वत्र ज्ञानेनतरेति संबंधिद्रव्यातिरिक्ते । निसाक्षादिति च व
क्तव्यं । कर्मेत्यादि । अवयविनोपि कर्मजनकत्वादसमवायीति । वेगस्थापितयालादनेकाश्रितेति । सत्तादिवारणाय गुणत्वव्याप्येति गुणानिष्ठा मा

वप्रतियोग्यपर्यका। कर्मजनकव्यक्तिसंग्रहायजातिगर्भता। गुरोरिति। गुरुत्वविशेषाणांस्नानादीनांप्रत्येकं च कारणघटकत्वं। कर्मविशेषोवेगजन्यः। उक्तो। उ
क्तशपं। तदस्मिन्नुत्तरक्रियाया विभागस्य पूर्वसंयोगनाशस्य वा उत्पादकालेपि तत्र द्रव्ये ऽन्यतरकर्मजसंयोग इत्यत आह तेनेति संयोगानकूलेति। संया
गैकदेशं दर्शयति। यत्रेत्यादिना। कस्यचिद्विभागस्य च्यवमात्रं। पथ्याहि संयोगस्यस्त्वजनककर्मणो नाशकत्वं। अन्यथा उत्पन्नमात्रस्य कर्मणः पू
र्वेनिन संयोगेन चलजो वा पूर्वसंयोगनाशकाले उत्पन्नस्य संयुज्यमानकर्मत्वेन तत्संयोगेन विनाशात् उत्तरसंयोगानुत्पत्तिप्रसंगात्। तथा स्यानु
कूलविभागस्यापि। अनुकूलश्च एको द्वौ वेति न कश्चिद्विशेषः। अन्यतरोभयकर्मजाभ्यां जनितयोः शब्दयोर्वैजात्यस्यानुभवाद्द्वैजात्यसिद्धि
रित्यपि वदंति। कर्मता ष्टात्परंपरासाधारणस्वाश्रयसमवेतत्वशून्य एव संयोगजनकं। तेन न परमाणुकर्मणा तद्दीपद्व्यणुकावंतावयवि
पर्यंतेतत्संयोगः। कारणः कार्यस्य समवायि। अकारणं। तस्य कार्यस्य साक्षात्परंपरासाधारणसमवायित्वशून्यं। तद्दृश्यपदवृत्तिः संयोगः तत्र कार्य
तेन कारणेन समं संयोगं जनयति। तेन न तुरीपवीरणसंयोगात्पटवीरणसंयोगः। न च एकस्य कपालस्य कपालांतरावयवपरंपरयासंयोगा
न तमासमं संयोगो घटस्य। नाप्येकस्य पाणेरंगुल्यान्तरेः संयोगात् पाण्यंतरेतरुसंयोगः। नापि शाखायास्ति संयोगान्तरुशरीरयोरन्योन्या रम॰
चयवपरंपराभ्यां संयोगः। केचित्तु साक्षात्परंपरासाधारणकार्यसमवायिवृत्तेरेव संगस्य तत्र कार्ये संगजनकत्वमिच्छंति। न च समवाय्यसमवा

पिसाधारणासमवायित्वं दुर्वचं। तत्संयोगस्य तद्रूपपोग्यत्वस्यैव प्रकृते तन्त्रत्वात्। तेषां तत्तत्परमाणुसंयोगादेव तत्परमाणवीयद्व्यणुकाद्यंत्यावयवपर्यंता
नां तत्संयोगः। एकं तु कपटवादिनं तु अवयवस्य कर्मविशेषात् संयोगविशेषाच्चावयवावयविनोरपि संयोगं वदंति। संयोगे न च विभागो व्या
ख्यातः। एकतं तु कपटवादिनां क्वचिदवयवावयविनोपि संयोगो यमगमादाह। यन्नेकेति। मूले तदकार्यत्व इति। कार्यत्व इति। कार्यत्वमिह सांप्रा
स्परंपरासाधारणं। तेनैककपालीयपरमाणुसंयुक्तपरकपालारब्धेन तत्परमाणुसंयोगिघटेन व्यभिचारः। तत्संयोगिकार्यत्वादिति। अत्र
संयोगस्य विशेषणत्वं तत्समानकालीनत्वया। प्रकाशेपापार्थिवेत्यादि। ततीयजलद्व्यणुकस्याविनाश्येत्यादि। तेन तदारंभकसंयोगना
शकालोत्पन्नतदीयपरमाणुसंयोगशालिनि न व्यभिचारः। मूले त्र वेत्यादि। अत्र विभागजविभागेपि कर्मानुप्रवेशो द्रष्टव्यः। युगपद्धस्ताभ्या
मवयवविभागापविकर्मभ्यामवयविनि विभागजननात्। अस्त्रापि चात्यापाह। शाखायां कर्म ततः शाखायाः पाणिविभाग पाणीकर्मणा अप
नाभ्यां तत्पाणिविभाग इति। कर्मणो विभागस्य तद्द्विरोधिसंयोगस्य च जननं प्रकृतेप्युक्तं संयोगजेन संयोगेन च क्वचिद्विभागस्यापि नोना
शानंतस्याभावात् भवतु संयोगजत्वे नैवेति न विरोधः संभावनाइत्यभिसंधायाह प्रकाशे अवयविनीत्यादि। अवयवकर्मणो विभागजका
लेवयविनि कर्मोत्पादासंभवात् कश्चित्केवलेनावसंयोगेन कश्चिच्च केवलेनावयविकर्मणा संयोगोत्पाद इत्यर्थः। अवयविकर्मणि

गु॰ शि॰ समेवावयविकर्मोत्पादस्यापनाशात् विभागनाशं व्युत्पादयतां भाष्यकारेणैवाभिधानादाहु। अपि चेति। टीकाकृतां पुनरयमभिप्रायः क
र्मसंयोगजन्यतावछेदकयोरिव प्रमाणसिद्धयोरुभयजन्यतावछेदिकाया अपि जातेः सौत्ताहृस्यतिरस्कारेण विविच्यानुपलंभेन वा धकः।
नवसंयोगद्वयकल्पनयैवोपपत्तौ। जातिभेदे मानाभावः अनंतसंयोगव्यक्तिकल्पनातो लाघवेनैकस्या एव जातेः कल्पनात् विजातीसंयोग
सामग्र्याप्रतिबंधकत्वाच्च न तदानीमेकैकजन्यजातीयसंयोगद्वयोत्पादः। एतेन विभागो व्याख्यातः। मूले विभागं अन्यतरकर्मजत्वादिना सं
योगस्य विभजनं प्रकारोऽत्यंताभावत्वेति। प्रतियोग्यसमानदेशाजन्याभावत्वं रूपस्यात्यंताभावत्वस्य प्रतियोगिसमानदेशत्वे व्याघातस्य पः।
भा।श्रयनाशजन्यरूपादिध्वंसवारणायाजन्येति। व्याघातवारणायात्यंताभावस्यास्य यानिवृत्ति। स्वप्रतियोगीमात्रेति न चेत्यादि। देशः कालस्या
प्युपलक्षकः उपाधित्वात्। संबंधावच्छिन्नप्रतियोगिताकाभावस्य संबंधांतरेण प्रतियोगिमति वृत्तेर्व्यभिचाराच्च संयोगस्येत्यादि। यत्कृतो
यथा प्रतियोगिप्रागता व योगिप्रागभावयोर्भिन्नकालावच्छेदेन एकत्र वृत्तौ न विरोधस्तथा प्रतियोग्यत्यंताभावयोरपि भिन्नप्रदेशावच्छेदेना
न्यथासिद्धप्रत्यक्षत्वान्न चैकदा त्वात्यंताभावत्वमानाधिकरण्यमेव तयोर्व्याप्यवृत्तित्वमिति। मूले नातो व्याप्युपादिति। अथवा एप॰
पकत्वेन संयोगस्यापि तथात्वं न हेदेवबाविहदं। प्रकाशेव वह्नित्यादि। अन्नोत्तरशब्दस्य पूर्वपूर्ववदेशाव्यापकत्वे घनसंघट्टजन्यशब्दसंता

नोक्तिमस्यापिआद्यशब्ददेशपर्यंतवृत्तित्वंस्यात्तन्नचैतदंतरेणनिमित्तपवनस्यतावद्दूरव्यापकत्वंसंभवतितदनवच्छिन्नेशब्दाद्युत्पादात्तत्
त्तुदुर्घटंचाप्रमाणकंच।नचोपदर्शितानियमेप्रमाणं।अतएवविंशत्संगुल्यवच्छेदेनेविंशतिप्रयत्नानांचरणशिरोवच्छेदेनसुखदुःखयो
र्युगपदेवोत्पादंवदंतिपरंतुशब्दसुखादीनांनिमित्तसंयोगादिवशादेवप्रवेशनियमः।मूर्त्तेसंयोगस्येत्स्यनिमित्तपवनसंयोगस्येत्यर्थः।
मूर्त्तेआकाशादपदत्यादिविभवत्त्वेनपरमाणुनातेनकर्मणासंयुक्तत्वेनित्यद्रव्यत्वेसतितद्वृत्तिक्रियाभूयस्त्वात्।नचतत्परमाणुसंयुक्तप
रमाणुसंयुक्तपरमाणुवदित्यर्थः।तत्रपरमाणौव्यभिचारवारणायविशेष्यं।यथाश्रुतेद्रव्यमात्रएवपरमाणुकर्मजन्यसंयोगसंभवात्।अ
नादौचसंसारेसर्वेषामेवपरमाणूनांसेतरयावत्परमाणुभिस्तत्तत्कर्मणासंयोगसंभवेनविपक्षत्वानिश्चयात्पक्षसमेयव्यभिचारसंश
यादोषतयानद्बाधकविशेषणतयातद्बाधकविशेषणोपादानेसंदिग्ध्यव्याप्यत्वासिद्धिकत्वात्विभवेनतत्परमाणुकर्मजन्यतत्संयोगवंतः
नित्यत्वेसतिनिष्क्रियत्वात्गोत्वादिवदनेनकर्मजन्यपरमाणुसंयोगाश्रयाःनित्यत्वात्परमाणुवत्।क्रियावत्रूपाद्योग्यत्वात्रूपादिवत्।न
तत्परमाणुसंयोगवंतःततएवतद्देवविभूनिष्ठाःसर्वेतत्परमाणुसंयोगाःतत्परमाणुकर्मजन्याःनित्यमात्रवृत्तित्वेसतितदितरकर्मज
न्यसंयोगत्वात्।निश्चलपरमाणौतुपरमाणुसंयोगवत्।सर्वेविभुपरमाणुसंयोगाःकर्मजाःनित्यमात्रवृत्तिसंयोगत्वात्परमाणुद्वयसंयोग

३१

गु॰ शि॰ वद्दित्यादौ वा तात्पर्यं। आकाशादिकं कालवृत्तिसंयोगवत्। द्रव्यत्वादेः कालयुक्तं वा कालान्यत्वे सति अनन्यवृत्त्यत्वप्रत्यक्षधर्मकालान्यत्वावच्छि
न्नस्य प्रकृष्टस्य साध्यस्य वा व्यापकं मूर्त्तत्वमुपाधिः। अप्रयोजकत्वं च। अप्रयोजकत्वं च। आकाशादिकं न तथा कालान्यत्वे सत्यमूर्त्तत्वात्। अमू
र्त्तत्वाद्यात्मसामग्रीरहितत्वाच्चेति। अत्र प्रकृष्टस्य कालान्यत्वावच्छिन्नस्य वा साध्यस्य व्यापकमद्रव्यत्वमुपाधिः। अंशउभावत्वाच्च न व्याप्य
त्वर्पविशेषणत्वं अप्रयोजकत्वं चा सामग्री व्यावृत्ताकार्यस्यैव व्यावृत्तेः। द्रव्यकार्यतावच्छेदकं वानुगतं द्रव्यत्वं जन्यभावत्वं वा कर्मादिजन्यत्वं
वविशेषविशिष्टं तं कार्यमात्रवृत्तित्वं च संयोगस्यासिद्धमिति। यद्यपि नित्यं सन्देहस्य प्रतिस्तप्यापि आकाशादिकं कालसंयोगनदसमानाधि
करणान्यतरधर्मसमवायित्वादेरिति सामान्यतो दृष्टमङ्क्षु प्रानेकसंयोगतत्त्वं वंधकत्वेने गौरवात् तन्नायथेन्नासिद्धे प्रसिद्धस्य तादृशसामाना
धिकरण्याभावस्य तत्त्वं वंधमेव साधयतीति। तादृशसंयोगतद्भेदान्यतरसाधकान्वयतदिन्नोप्यवेन तद्भेदसिद्धिरित्यपि वदन्ति। अ
त्येसा पुनरित्यादि। एषगतिमत्त्वं परस्परसंयोगजनकगतिमत्त्वं। द्वयोर्यपाचलनयोः परमाण्वोर्मध्ये योऽन्यतरस्य पापरमाण
वाकाशपोर्यपुता अपाश्रयितं पुनेसंयुक्ते आश्रये आश्रितत्वं एकतरस्य द्रव्यस्य स्थानाश्रयेण मन्तरेण संयुक्ते समवेतत्वमिति ६७॰
पावत्। आश्रयत्वं चात्र साक्षात्परंपरासाधारणं। तेनैकेन कपालेन तद्वयवपरंपरयावत्संयुक्तेकपालान्तरे वृत्तत्वं प्रवेतत्वेपि

नव्याप्तिः। एकतरसमवेतावृत्तिसंयोगजनको यस्तदेकतरप्रतियोगिकः संयोगस्तद्वृत्तिसमवेतत्वं वा द्वयमपीदं कुविद्वयोः कुविदेकतरस्याप
कातिसंक्रांतेरदोषत्वे एकतरस्यगतिसत्वंएकतरस्यसमवेतत्वं चेति वपाश्रुतमेव सौधीयः। संयोगानुत्पादेन तत्कारणाविरहादिति। मूले।
शाखावित्यादि। विशेषौ संयोगौ कर्मजन्याजन्यौ। कर्मजन्यस्य संयोगस्य व्यापकं पृथक्गतिमत्वं कर्माजन्यस्य च युताश्रयाश्रितत्वं पृ
थग्वृत्त्यादयोः संयोगवियोगयोर्निवृत्तेसाधनायेति। प्रकाशे अयुतसिद्धिप्रतीहि प्रतीघातात्निरुक्तयुतसिद्धिद्वयव्यतिरेकप्रतीयात प्रसं
गात्युतसिद्धिसामान्यस्य तद्वयाव्यतानूपस्य। स्वाश्रयेति। अपनाते कस्य न भातिस्विकरूपेणाततमनुगमात्। स्वाश्रयासमवायिकार
णासमवायिकारणानाशकत्वासामाश्रयनाशकत्वेन वा तत्तेत्वाद्युवादाश्रयनाशत्वेवतदित्यर्थः। द्रव्ययोरनुत्पन्नसंयोगयोर्विभक्तप्र
त्ययाभावमभिप्रेत्य मूले संयोगविनाशइत्युक्तं। संयोगत्वावच्छिन्नेति। उत्पन्नसंयोगत्वावच्छिन्नेत्यर्थः ध्वंसस्य सामान्याभावत्वाभ्युप
गमेपि अन्यदीयसंयोगध्वंसस्यान्यत्रासंभवात्। उत्पन्नत्वस्य च तत्तत्कालभेदेन भिन्नतया तदवच्छिन्नाभावानामननुगमाच्चाह। स्वस
मानेत्यादि। तत्समानकालीनत्वं तदनधिकरणकालावच्छिन्नत्वं। मूले सत्याश्रयइति यइतिनाशंकांतरं व्यवच्छिन्नं समवायिकारणके
ति। कारणनाशान्योपलक्षकं। गुणेतिस्वरूपकथनं समवायिकारणस्येति प्रकृताभिप्रायेण परत्वादेरिव संयोगस्यापि असमवा

गु॰ शि॰ पिकारणनाशप्रले कर्मजन्मनत्स्य क्षणद्वयमात्रावस्थायित्वापत्तेः। मूले हत्तनन्तरसंयोगनाशेन स्यादिति विरोधिनं कारणनाशं च विना शा
नुत्पादात्। कर्मणः समानाधिकरणस्य तदानीमभावात् व्यधिकरणस्य च तथात्वेति प्रसंगादित्यर्थः। कारणनाशमाशंक्य निरस्यति। न चे
त्यादिना। यथा समानाधिकरणत्वाविशेषेपि कश्चिदेव धर्मो नाशकः कल्प्यते फलबलात् तथाऽकारणीयत्वाविशेषेपि कश्चिदेव धर्म
नाशकल्प्यते फलबलात्तथाकारणीयत्वाविशेषेपि कश्चिदेव नाशकस्तथात्वे तत एवेत्याभिप्रायिकामाशंकां निरस्यति प्रकारान्तरेण न चेत्यादि
ना। आश्रयेति करणमात्रपरं। कालादिनापि संस्कारनाशोपगमादाह। समानाधिकरणस्येति। क्वचिदसमवायिकारणनाशस्य समा
नाधिकरणत्वेपि नाशत्वेपि तत्तंत्रपरं वहाप्यि तदन्तं ज्ञत्वोपगमे नाशकत्वं संभवत्येव। नियमोपि चाश्रयमात्रगोचर इति विभावनीयं। व्यर्थत्वस्य
स्वमतत्स्यादि। आश्रयेति। आश्रयेति। आश्रयनाशजन्यत्वं सत्त्वादित्यर्थः। कर्मजनितेत्यस्य स्वरूपकथनमात्रं द्योतयन्नाह। विभागजेति।
मूलेत्वाश्रयेति। स्वाश्रयेतदाश्रितपरंपरया परतयांचयः संयोगः कर्मणस्तन्नाशकत्वादित्यर्थः। त्रियो विंशतीत्यादि पूर्वपक्षेपं पथारं
भकसंयोगविरोधिविभागजनकस्य कर्मणोऽनारंभकसंयोगविरोधिविभागजनकत्वात् शौभयविभागजनकत्वस्वभावविशिष्टः स्यात्तद रम०
विनैव प्रयासं कारणमात्रविभागपूर्वको विभागः स्यात्। न तेन तदुत्पत्तिप्रकारान्तरेण तत्त्वाधनीयमित्याह। तत्रेत्यादि। एवं चैकस्यैव कर्मणः

स्यादृशोभयविभागजनकत्वेकृतवैजात्यसद्भावकल्पनया। सामान्यतस्त्वनारंभकविरोधिविभागजनकत्वेनैवसामंजस्यादित्यभिसंधायाह
न घाचेत्यादि। नेष्यापिकात्वं एवंचेत्यादिनोक्तमेवसाधीयः। एकस्यैवकर्मणस्तादृशोभयविभागजनकत्वेविरोधाभावात्। तादृशैकैवि
भागजनकतावच्छेदकजातिद्वयकल्पने गौरवात् तत्र स्पष्टमाणानामनुमानानाम्प्रयोजकत्वादिति। अनवगतसाध्यसहचारेत्यादिलक्षणाभि
प्रायेण। द्रव्यानारंभकसंयोगविरोधिविभागजनत्वादितितादृशकर्मजन्यसंयोगस्यत्वनाशकत्वाद्विभागेति। विभागजनकत्वात् विभा
गासमवायिकारणत्वात्। आरंभकस्मिवेति केवलं दृष्टांतस्पष्टीकरणाय। अनारंभकसंयोगसद्भ असत्वेपि द्रव्यनिविरहात् तस्यापना
योप्रत्नोपधानाभावः साध्यः तथाचप्रत्यनुमानेऽवयवसंयोगनाशकात्तोत्पन्नावयविकर्मणि न व्यभिचार इत्यविनश्यदवस्थेति। सहका
रीति। वस्तुतोमयपाकपंचितृपालहपसंयोगात् घयानुत्पत्तेरन्वव्यतिरेकतश्च सहकारिविशेषस्यविरहात् संयोगवैजात्यमेवपर
जनौपयिकंअन्यथाकर्मण्येपितद्वकारिविशेषाधीनंविभागविशेषाधीनंविभागविशेषजनकत्वमितिनत्रापिवैजात्यंनस्यात् भा
घ्योक्तादिविशेषस्यापेक्षासंभवातिप्रसक्तेपि परंतुप्रमाणशून्यसुवचत्वकर्मण्यपि। अतः समानाधिकरणस्यैवसावच्छ्यातादृशंच
समवायिकारणंकारणंकार्यद्रव्यमेवतत्रास्तिप्रसक्तेनैवतदसंभवात्। परिशेषेणारंभकसंयोगनाशस्तज्जन्यः कार्यद्रव्यनाशोवा

तादृशा इत्यक्षरतात्पर्यमप्यांमाह। कारणेत्यादिना। कर्मानपेक्षत्वं विना कर्मापेक्षत्वं। कर्मानपेक्ष्यमिति पाठे कर्मणोऽनपेक्षणोपमितत्वर्थः। अंगुलीत
रुविभागादित्यस्यांगुल्यावयवाचयविविभागाधीनजन्यन इत्यादि। चतुर्थविभागे कर्मणः पूर्ववर्त्तित्वेनापेक्षासंभवान्मूले पंचमेति। एकत्रे
त्यादिविशेष्यस्य व्यधिकरणत्वेपि विशेषणस्य समानाधिकरणत्वात्रोपवर्णितस्यापेक्षत्वस्याघात इति भावः। स्वतस्तु कारणाकारण
मात्रविभोगेनैव कारणामात्रविभागेनापि सत्येवावयविनि तदारंभके च संयोगे विभागजनने विरोधाभावात्। न हि नाशापेक्षापांश्मा
णाभावः कर्मत्वनियतवानपेक्षकारणत्वं तत्र तत्र व्यावर्त्तकारेण वास्माभिरुपदर्शितमिति। वेणुदलविभाग इति पाठे वेणुदलयोर्विभा
गस्येत्यर्थः। आकाशेति योग्यदेशोपलक्षणं। यथाऽनारंभकसंयोगविरोधिविभागजनककर्मणामारंभकसंयोगविरोधिविभागजनकत्वे
दलहृदयविकाश एव। कमलनाशप्रसंगः तत्र यथाविधस्यापि विभागस्य तथात्वेक्षणमात्रं विलंब्यादित्याह। द्रव्यारंभकेत्यादिना। व्याप्तेरयमि
ति। साधारणं। नित्यानामपि यमेवमनित्यानां पुनः क्वचिदिप्यमन्यथात्वन्यामाह। पुनेषुमात्रयेषु समवायपद इति वकृत्वमसावक्षिकत्वादविवक्षि
तं। नित्यानित्ययोरुभयथासंभवं हृपीति। यद्यपि पूर्वोपवर्णितस्य मिथोविभागहेतुक्रियासंबंधस्य नातिप्रसंगसंभावना तथापि यथा राम॰
क्तेशंका। मूलेन त्वियमित्यादि। असमवायसहचारिणा। असमवेतत्वव्याप्ता। इत्थं च यद्यगिति स्वरूपकीर्त्तनमात्रं। परस्परेति द्रव्या।

णां परस्परपरिहारेण एकैकपरित्यागेनाश्रयेषु आश्रयविभागं प्रपञ्च्य तेषु एकपराश्रयादिभिन्नेषु अन्यतराश्रयेषु तेषु मिथः संयुक्तेषु समवा
यः तथा च स्वत्वानाश्रयीभूतमिथः संयुक्तपरंपराश्रयसमवेतत्वमर्थः । यथा आप्यस्य द्व्यणुकस्य स्वत्वानाश्रये पार्थिवपरमाणौ संयुक्ते आ
प्यपरमाणौ पार्थिवद्व्यणुकस्य स्वत्वानाश्रये आप्यपरमाणौ संयुक्ते पार्थिवपरमाणौ संयुक्ते पार्थिवपरमाणौ समवेतत्वमिति । घटीयपरमा
णवादेरपि परंपरया घटाश्रयत्वान्नातिप्रसंगः नित्यानित्ययोरेकतरस्यानित्यत्वे सति तत्समवेतत्वे तत्संयुक्तसमवेतद्रव्यत्वमन्यतरस्य ।
इदं पुनरिहावधेयं । यदेतयोरपि न सर्वत्र प्राप्यत्वं नित्यानां तु द्वयोर्नित्यद्रव्यत्वे सत्यन्यतरस्य । इदं पुनरिहावधेयं । यदेतयोरपि न सर्वत्र प्राप्य
त्वं नित्यानां तु द्वयोर्नित्यद्रव्यत्वे सत्यन्यतरस्य गतिमत्त्वं व्यापकं सर्वसाधारणं । द्वयोः परंपरासमवेतत्वे सत्यन्यतरस्य गतिमत्त्वं तच्चैतद्योग्यता
मूर्तत्वमिति यावत् । असमवेतत्वं साक्षात्परंपरासाधारणसमवेतत्वव्यतिरेकः । प्रकाशे प्रत्यासत्त्येति । प्रत्यासत्तित्वं समवायेन । प्रत्यासत्त्वं वदे
धात्तत्समवायित्वात्तत्समवेतत्वाच्चातस्यैकतरसमवायिनः समवायेन यत्प्रत्यासन्नं तत्समवायितत्समवेतं वा तत्समवेतत्वम
न्यतरस्यान्यतरसमवायिनः । यत्समवायेन प्रत्यासन्नं तत्समवेतत्वमपरस्य । एकैककपालसमवायिनः समवायेनाप्रत्यासन्नकपालांतरे घ
टस्य समवेतत्वेपि घटसमवायिसामान्यस्य समवायेनाप्रत्यासन्नैककपालस्य समवेतत्वं नास्तीति प्रसंगः । परमाणोः समवायेन प्रत्यासन्नं

तत्समवेतमेवतमेवप्रसिद्धमितितन्द्व्यणुकयोरप्रसंगः द्व्यणुकस्यत्रसरेणुसमवाय्यसमवेतपरमाणुसमवेतत्वात्त्रसरेणोश्चतद्व्यणुकसमवाय्य
समवेतद्व्यणुकांतरसमवेतत्वात्साधारणानुपाभिधानंसमवायित्वंपूर्ववत्। मूलेऽप्राप्तयोः संबंधशून्ययोर्विद्यमानताएकक्षणोवर्त्ति
मानत्वंतेनप्राक्समवायिनः समवायिनाक्षणेऽचकार्यस्यसत्वेप्यदोषः परस्परंप्राप्तिप्रागभाववत्वंवाविवक्षितं। प्रकाशेनस्पति। नतिष्ठती
त्यर्थः। मूलेतुलतउत्तरविभागिति। उत्पन्नमात्रस्यैवावयवविभागस्यावयवसंयोगनाशकालत्वएवंनाशात्तस्यैवंचापेक्षणीयासंयत्तेनतर
कालत्वंवासत्ताद्रव्यमवाकाशविभागोनस्यादितसादित्यर्थः। अत्रविभागेपदयारंभकाल्लारंभकसंयोगविरोधिमूर्त्तवृत्तिविभागद्वयजननेनवि
रोधस्तद्वाविकाशमात्रएवकमत्वनाशापत्तिरित्यर्थः। तस्मादिति। तथाचारंभकसंयोगविरोधिविभागजनकस्यैककर्मणः आरंभकसंयो
गविरोधिविभागजनकत्वंविहन्यतेनत्वारंभकोयः संयोगस्तद्विरोधिविभागजनकस्य। तेनांशुतंतुसंयोगस्यपटानारंभकत्वेपिनक्षति
रितिमंतव्यं। यत्पुनरंशुतंतुसंयोगस्यापिपटनिमित्तकारणत्वंद्रव्यानारंभकत्वस्यत्रचकारणत्वमात्रस्याभावोविवक्षितोनत्वसमवायिका
रणत्वस्यैवेत्यर्थः। तदसत्। तंतुतुरीयसंयोगविरोधिनंविभागंजनयतएवकर्मणोऽनारंभकसंयोगविरोधिविभागजनकत्वंनपुनरना राम॰
रंभकसंयोगस्यविरोधिनंविभागंजनयतइत्यत्रकिंनियामकंकिंच। अंशुतंतुविभागेनकारणविभागमुद्भयाद्विभागोजनयितव्यःका

रणमात्रविभागमुद्दयावानाद्यः। तंतोरेव तपाविभागसंभवात्। नद्वितीयः। अंशोः पठाकारणत्वात्। कारणानोपगमेपिसमवायिकारण
त्वविरहात्। समवायिकारणमात्रवृत्तेरेवविभागस्यकारणविभागजनकत्वात्। अन्यथातुरीयतंतोर्दंडकपालयोश्चविभागात्तंतुकपा
लयोरेवापिकारणमात्रवृत्तेरेववविभागस्यकारणविभागजनकत्वात्। अन्यथातुरीयतंतोर्दंडकपालयोश्चविभागात्तंतुकपालयोरेवाका
शादिदेशविभागप्रसंगात्। शक्यतेचात्रापिकारणविभागस्यत्वेद्रव्यापेक्षणीयोद्दिग्विशेषोवकुमतआहअपचेति॥ ॥इतिश्रीमथुरा
पूर्वशिरोमणिविरचितोगुणशिरोमणिः समाप्तम् शुभमस्तु॥ ॥श्रीमद्विश्कृतमूलांकवंशवारिधिसंभवः। जयतिश्रीकलाम्नवक
त्वावानस्मुरेश्वरः १ पद्मदेशासुरेशंभोः पुत्त्रमेतद्लेखयत्। कान्यकुब्जान्वयमणिः कलाधरकवीश्वरः २ ॥ ॥

राम०

४१

88/2(d)

इति

॥ गुणशिरोमणिलिखितोयं॥

माधवाचार्यप्रणीत॰



88/2(d)



४१